लक्ष्म्या पृष्ठतः परिमललग्नमधुकरवेणिव्याजेन केशेष्विव कर्मसिद्धिमाकर्षन्नेकाकी नगरान्निरगात् । अगाच्च तमुद्देशम् ।

अथ प्रत्युज्जग्मुस्ते त्रयो द्रौणिकृपकृतवर्माण इव सौप्तिके संनद्धाः स्नाताः स्रग्विणो गृहीतविकटवेशाः, कुसुमशेखरसंचारिभिः क्रियमाणमन्त्रशिखाबन्धा इव गुञ्जद्भिः षट्चरणैरुष्णीषपट्टकांञ्चलाटमध्यघटितविकटस्वस्तिकाग्रन्थीन्महामुद्राबन्धानिव धारयन्तः, मूर्धभिरेकश्रवणविवरविततविमलदन्तपत्रप्रभालोकलेपधवलितकपोलैर्मुखैरापिबन्त इव निशाचरापचयचिकीर्षया शार्वरमन्धकारमितरकर्णावलम्बिनां रत्नकुण्डलानामच्छाच्छया रुचा गोरोचनयेव मन्त्रपरिजप्तया समालब्धाः, स्वप्रतिबिम्बगर्भान्कर्मसिद्धये दत्तपुरुषोपहारानिवोल्लासयन्तः, निशितान्निस्त्रिंशान्निस्त्रिंशांशुसंतानसीमन्तिततिमिरामात्मीयात्मीयदिग्भागसंरक्षणाय त्रिधेव त्रियामां पाटयन्तः, सार्धचन्द्रैः कलधौतबुद्बुदावलितरलतारागणैर्निशाया इव परुषासिधारानिकृत्तैः खण्डैर्गृहीतैश्चर्मफलकैरकाण्डशर्वरीमपरां घटयन्तः, काञ्चनशृङ्खलाकलापनियमितनिबिडनिष्प्रवाणयः, बद्धासिधेनवः, टीटिभकर्णतालपातालस्वामिनो निवेदितवन्तश्चात्मानम् ।

अवनिपतिस्तु—'कोऽत्र कः' इति तानपृच्छत् । आचचक्षिरे च स्वं स्वं नाम त्रयोऽपि ते । तैरेव चानुगम्यमानो जगाम तां बलिदी-

---

सुप्तेषु भवं सौप्तिकम् । धृष्टद्युम्नाधिष्ठिताक्षौहिणीविनाशाय दुर्योधनप्रेरितदिवार्जुनाधिष्ठितानां न किंचिदेषां शक्यमिति रात्राववस्कन्दमयच्छन्निति वार्ता । संनद्धः सकवचः । उक्तं च—'सं[illegible] [illegible]तः सज्जो दंसितो व्यूढकङ्कटः' । अपचयो [illegible]तिः । [illegible] सहोपमेयम् । उल्लासयन्तश्चालयन्तः । सार्धच[illegible] निशायां खड्गेषु चन्द्रखण्डस्य [illegible]यमानत्वादेवमुक्तम् । न तु वस्तुवृ-
र्घगौश्च । उक्त[illegible] शीक्षपायां चन्द्रः संभवतीति । कलधौतं हेमरौप्यं वा । बुद्बुदावलि-
लिहा च गौर्व[illegible] र्मफलकैः स्फटकैः । एकस्यावर्तमानत्वादाह—अपरामिति ।
तन्त्रीतन्तवः । [illegible] वस्त्रम् । उक्तं च—'अनाहृतं निष्प्रवाणि तन्त्रकं च नवाम्बरे' ।
वेककुशला मतिः [illegible]
व्याख्येयम् । [illegible]कदेशोऽयम् । अत्र कः कः स्थित इत्यर्थः । ब-

लाहलाकुलकुटुम्बिनीविकीर्णकेशकलापशबलशवशिबिकासहस्रसं-कुलाः किलकिलायमानश्मशानशिबिरशिवाशावकाः परलोकावस-थपथिकसार्थप्रस्थानविशिखावीथयः । सकललोककवलावलेहल-म्पटा बहला वहंलिहा लेढि लोहिताचिता चिताङ्गारकाली काल-रात्रिजिह्वा जीवितानि जीविनाम् । तृप्तिमशिक्षिता च भगवतः सर्वभूतभुजो बुभुक्षा मृत्योः । अतिद्रुतवाहिनी चानित्यतानदी । क्षणिकाश्च महाभूतग्रामगोष्ठ्यः । रात्रिषु भङ्गुराणि पात्रयन्त्रपञ्जर-दारूणि देहिनाम् । अशुभशुभावेशविवशा विशरारवः शरीरनि-र्माणपरमाणवः । छिदुरा जीवबन्धनपाशतन्त्रीतन्तवः । सर्वमात्म-नोऽनीश्वरं विश्वं नश्वरम् । एवमवधृत्य नात्यर्थमेवार्हसि मेधाविनि मृदुनि मनसि तमसः प्रसरं दातुम् । एको हि प्रतिसंख्यानक्षण आधारीभवति धृतेः । अपि च दूरगतेऽपि हि शोके नन्विदानी-मपेक्षणीय एवायं ज्येष्ठः पितृकल्पो भ्राता भवत्या गुरुः । इत-रथा को न बहु मन्येत कल्याणरूपमीदृशं संकल्पमत्रभवत्याः काषायग्रहणकृतम् । अखिलमनोज्वरप्रशमनकारणं हि भगवती प्रव्रज्या । ज्यायः खल्विदं पदमात्मवताम् । महाभागस्तु भिनत्ति मनोरथमधुना । यदयमादिशति तदेवानुष्ठेयम् । यदि भ्रातेति यदि ज्येष्ठ इति यदि वत्सल इति यदि गुणवानिति यदि राजेति सर्वथा स्थातव्यमस्य नियोगे ।' इत्युक्त्वा व्यरंसीत् ।

उपरतवचसि च तस्मिन्निजगाद नरपतिः—'आर्यमपहाय कोऽन्य एवमभिदध्यात् । अनभ्यर्थितदैवनिर्मिता हि विषमविपद्-

---

कुटुम्बिन्योऽपहेलाः । शिबिका वाहनम् । श्मशानमेव शिबिरं येषां ते । बहला दीर्घगौश्च । उक्तं च—'बहलाः कृत्तिका गावः' इति च । वहंलिहा छिद्रान्वेषिणी, वहंलिहा च गौर्वत्सस्य भवति । देहिनां शरीरवतां जीवाः प्राणिन एव । बन्धनपाशतन्त्रीतन्तवः । आत्मनोऽनीश्वरं न स्वायत्तम् । परतन्त्रमित्यर्थः । प्रतिसंख्यानं विवेककुशला मतिः । दूरगते परधराधिरूढे । ज्येष्ठो भ्रातेत्याद्युत्तरोत्तरं साभिप्रायं व्याख्येयम् ।

वलम्बनस्तम्भा भवन्तो लोकस्य । स्नेहार्द्रमूर्तयो मोहान्धकारध्वंसिनश्च धर्मप्रदीपाः । किंतु प्रणयप्रदानदुर्ललिता दुर्लभमपि मनोरथमतिप्रीतिरभिलषति । धीरस्यापि धार्ष्ट्यमारोपयति हृदयलघिमलङ्घितमतिवल्लभत्वम् । युक्तायुक्तविचारशून्यत्वाच्च शालीनमपि शिक्षयन्ति स्वार्थतृष्णाः प्रागल्भ्यम् । अभ्यर्थनाया रक्षन्ति च जलनिधय इव मर्यादामार्याः । दत्तमेव च शरीरमिदमनभ्यर्थितेन प्रथममेवातिथ्याय माननीयेन भवता मह्यम् । अतः किंचिदर्थये भदन्तमियं नः स्वसा बाला च बहुदुःखखेदिता च सर्वकार्यावधीरणोपरोधेनापि यावल्लालनीया नित्यम् । अस्माभिश्च भ्रातृवधापकारिरिपुकुलप्रलयकरणोद्यतस्य बाहोर्विधेयैर्भूत्वा सकललोकप्रत्यक्षं प्रतिज्ञा कृता । पूर्वावमाननाभिभवमसहमानैरर्पित आत्मा कोपस्य । अतो नियुङ्क्ष्वां कियन्तमपि कालमात्मानमार्योऽपि कार्ये मदीये । दीयतामतिथये शरीरमिदम् । अद्य प्रभृति यावदयं जनो लघयति प्रतिज्ञाभारमाश्वासयति च तातविनाशदुःखविक्लवाः प्रजाः, तावदिमामत्रभवतः कथाभिश्च धर्म्याभिः, कुशलप्रतिबोधविधायिभिरुपदेशैश्चारजोभिः, शीलोपशमदायिनीभिश्च देशनाभिः, क्लेशप्रहाणहेतुभूतैश्च तथागतैर्दर्शनैः, अस्मत्पार्श्वोपयायिनीमेव प्रतिबोध्यमानामिच्छामि । इयं तु ग्रहीष्यति मयैव समं समाप्तकृत्येन काषायाणि । अर्थिजने च किमिव नातिसृजन्ति महान्तः । सुरनाथमात्मास्थिभिरपि यावत्कृतार्थमकरोद्दैर्योदधिर्दधीचः । मुनिनाथोऽप्यनपेक्षितात्मस्थितिरनुकम्पेति कृत्वा कृपावानात्मानं वठरसत्त्वेभ्यः

अनभ्यर्थितेत्यादौ ध्वनिच्छायावगन्तव्या । धीरस्य गम्भीरस्य । लङ्घितमाक्रान्तम् । शालीनमधृष्टत्वम् । भदन्तेति बौद्धकर्मविशेषपूजावचनम् । अवधीरणमुपेक्षणम् । विधेयैरायत्तैः । नियुक्तां स्वीकरोतु । देशनाभिः शिक्षाभिः । क्लेशा अविद्यादयः । तेषां प्रहाणम् । तथागतैर्बौद्धैरात्मास्थिभिरपि यावदित्यत्र यावच्छब्दोऽवधारणे । मुनिनाथः सुगतः । वठरसत्त्वा जडप्राणिनः, सिंहाद्याः । एवं किल श्रूयते—पुरा काचन सिंही प्रसवकाले बुभुक्षातुरा स्वशावकान्भक्षयितुं प्रवृत्ता सौगतेन च समालोक्यातिकारुण्यात्स्वमांसप्रदानेन तस्मान्निवारितेति ।

कतिकृत्वो न दत्तवान् । अतः परं भवन्त एव बहुतरं जानन्ति ।' इत्युक्त्वा तूष्णींबभूव भूपतिः ।

भूयस्तु बभाषे भदन्तः—'भव्या न द्विरुच्चारयन्ति वाचम् । चेतसा प्रथममेव प्रतिग्राहिता गुणाः कायबलिमिमाम् । अमुना जनेनोपयोगस्तु निरुपयोगस्यास्य लघुनि गुरुणि वा कृत्ये गुणवदायत्तः' इति । अथ तथा तस्मिन्नभिनन्दितप्रणये प्रीयमाणः पार्थिवस्तत्र तामुषित्वा विभावरीमुषसि वसनालंकारादिप्रदानपरितोषितं विसर्ज्य निर्घातमाचार्येण सह स्वसारमादाय प्रयाणकैः कतिपयैरेव कटकमनुजाह्नवि निविष्टं प्रत्याजगाम ।

तत्र च राज्यश्रीप्राप्तिव्यतिकरकथां कथयत एव प्रणयिभ्यो रविरपि ततार गगनतलम् । बहलमधुपङ्कपिङ्गलः पङ्कजाकर इव संचुकोच चक्रवाकवल्लभो वासरः । प्रकीर्णानि नवरुधिररसारुणवर्णानि लोकालोकजूंषि यजूंषीव कुपितयाज्ञवल्क्यवक्त्रवान्तानि निजवपुषि पूषा पापमुषि पुनरपि संजहार जालकानि रोचिषाम् । क्रमेण च समुपोह्यमानमांसलरागरोचिष्णुरुष्णांशुरुष्णीषबन्धसहजचूडामणिरिव वृकोदरकरपुटोत्पाटितः, प्रत्यग्रशोणितशोणाङ्गरागरौद्रो द्रौणायनस्य रुद्रभिक्षादानशौण्डपुरमथनमुक्तमुण्डशिरानाडिरुधिरपूरणकपिलः, कपालकर्पर इव च पैतामहः, पितृवधरु-

भव्या भाग्यवन्तः । काय एव बलिहेतुत्वाद्बलिरिव कायबलिस्ताम् ।

पद्मषण्डोऽपि चक्रवाकप्रियो मुकुलितो भवति । रुधिररसवत्तेन चारुणवर्णानीति । यजूंषीति वेदोपलक्षणार्थः । याज्ञवल्क्यः शाकल्यस्य मुनेर्वेदानधीत्याज्ञामकुर्वन्गुरुणोपालब्धः 'वेदान्परित्यज' इति । ततस्तेन चत्वारोऽपि वेदा रक्तोपलिप्ता उद्वान्तास्ते च शाकल्यमुनिना स्वे वपुषि संक्रान्ता इति श्रुतिः । क्रमेणेत्यादावुष्णांशुर्मुहूर्तमेवंविधो दृश्यत इति संबन्धः । समुपोह्यमानो वर्धमान इत्यर्थः । उष्णीषो बध्यते यत्र स उष्णीषबन्धो मस्तकः । वृकोदरो भीमसेनः । द्रौणायनोऽश्वत्थामा । अत्र कथा—अश्वत्थामा सौप्तिके हतपुत्रया द्रौपद्या भीमसेनोऽभिधाय यद्यश्वत्थाम्नः शिरश्छित्त्वा नानीयते तदहं जीवितं त्यजामीति । ततोहऽमेवं करोमीति प्रतिज्ञाया-

षितरामरागरचितः, पृथुविकटकार्तवीर्यांसकूटकुट्टाककुठारतुण्डत-
ष्टदुष्टक्षत्रियकण्ठकुहररुधिरकुल्याप्रणालसहस्रपूरितो ह्रद इव दू-
ररोधी रौधिरो भयनिगूढकरचरणमुण्डमण्डलाकृतिर्गुरुगरुडनखप-
ञ्जराक्षेपक्षपणक्षिप्तक्षतजोक्षितो व्यसुर्विभावसुः, कमठ इव च
लोठ्यमानः, नभस्यरुणगर्भमांसपिण्डाण्ड इव च खण्डमानमानी-
तः, नियतकालातिपातदूयमानदाक्षायणीक्षिप्तः, धातुतट इव च
सुमेरोरसुरवधाभिचारचरुपचनपिशुनः, शोणितक्राथकषायितकु-
क्षिरतिविसंकटः, कटाह इव च बार्हस्पत्यः, सद्योगलितगजदान-
वदेहलोहितोपलेपभीषणः, मुखमण्डलाभोग इव महाभैरवस्य मुहू-
र्तमदृश्यत जलनिधिजलप्रतिबिम्बितरविबिम्बराजिभास्वराभ्रावल-
म्बिनी गृहीतार्द्रमांसभारेव चावभासे वासरावसानवेला वेताल-
निभा ज्वलत्संध्यारागरज्यमानजलप्रवाहः, पुनरिव पुराणपुरुषपी-
वरोरुसंपुटपिष्टमधुकैटभरुधिरपटलपाटलवपुरभवदधिपतिरर्णसा-
म्। अवसिते संध्यासमये समनन्तरमपरिमितयशःपानतृषिताय
मुक्ताशैलशिलाचषक इव निजकुलकीर्त्या, कृतयुगकरणोद्यताया-
दिराजराजतशासनमुद्रानिवेश इव राज्यश्रिया, सकलद्वीपजिगी-

यान्तं भीमं दृष्ट्वा व्यासाश्रमस्थो रणश्रान्तो घृताभ्यक्तोऽश्वत्थामा शस्त्राभावादिषीकाः संमन्त्र्य ब्राह्ममस्त्रं भीमवधाय ददौ। एकाकिनश्च भ्रातुर्गमनाद्भीतेनार्जुनेन कृष्णसहितेन तमेवानुसरता ब्रह्मशिरोऽस्त्रं मुमुचे। तदवसरागतैश्च नारदाद्यैर्मध्यस्थैर्भूत्वोक्तं द्रौणेरस्त्रमभिमन्त्र्य प्रियाया गर्भे पतत्विति। अर्जुनेनाप्यात्मीयेऽस्त्रे संहृते भीमोऽश्वत्थाम्नः सहजं मूर्धमणिमुच्चीय नातिचिरेणाजगामेति। मुक्तं त्यक्तम्। मुण्डं शिरः। सिरा नाड्यः। रुधिरवाहिन्यो नाड्यः। कुट्टाकश्छेदनशीलः। कुठारतुण्डं कुठारधारा। आक्षेपक्षपणमुत्क्षिप्य परित्यागः। क्षिप्तं निःसृतम्। लोठ्यमानः परिभ्रमन्। नियतकालातिपातः प्रलयागमः। दाक्षायणी काली। पिशुनः सूचकः। वेतालोऽपि गृहीतार्द्रमांसभरो भवति। पटलं समूहः। अवसिते निवृत्ते संध्यासमये निशया। नरेन्द्राय श्वेतभानुरुपानीयतोपायनीकृत इति संबन्धः। आदिराजस्य मनोः, वैन्यस्य वा। मुद्रानिवेशो राज्याधिकारमहामुद्रा। चलिताय निर्गताय। आयत्यागामिशुभ-

षाचलिताय श्वेतद्वीपदूत इव चायत्या, श्वेतभानुरुपानीयत निशया
नरेन्द्रायेति।

इति श्रीबाणभट्टकृतौ हर्षचरितेऽष्टम उच्छ्वासः।

दैवेनेति भद्रम्।

दुर्बोधे हर्षचरिते संप्रदायानुरोधतः।
गूढार्थोन्मुद्रणां चक्रे शंकरो विदुषां कृते॥

इति महाकविचूडामणिशंकरकविरचिते हर्षचरितसंकेतेऽष्टम उच्छ्वासः।

समाप्तोऽयं ग्रन्थः।

विक्रीस तयार.

निर्णयसागर छापखान्यांतील पुस्तकें.

प्राकृत.

आनंदराव. ... ... किंमत ३ आणे, ट. ॥ आणा.

आर्यवृत्त. ... ... किंमत १ आणा, ट. ॥ आणा.

आरत्या.—भाग पहिला. ... ... किंमत ॥ आणा, ट. ॥ आणा.

आल्फ्रेद धि ग्रेत ह्याचें चरित्र. ... किंमत १० आणे, ट. १ आणा.

इंग्रजी सुरस रत्नमाला. ... ... किंमत ३ आणे, ट. ॥ आणा.

इंद्रियमहत्त्वविचार.... ... ... किंमत ८ आणे, ट. १ आणा.

कहाण्या. ... ... किंमत ३ आणे, ट. ॥ आणा.

कालिदासकविविरचित रघुवंशनामक महाकाव्य ह्याचें मराठी
पद्यात्मक भाषांतर.... ... किंमत २ रुपये, ट. ३ आणे.

कादम्बरी कथासार. ... ... किंमत ३ आणे, ट. ॥ आणा.

कृष्णाकुमारी काव्य... ... ... किंमत ५ आणे, ट. ॥ आणा.

गरुडपुराण... ... ... किंमत १। रुपया, ट. २ आणे.

गीतापद्यमुक्ताहार.... ... ... किंमत २ रुपये टपालसह.

गृहवैद्य. ... ... किंमत १२ आणे, ट. २ आणे.

छत्रपति संभाजीमहाराज. ... ... किंमत १। रुपया, ट. २ आणे.

जन्माष्टमी. ... ... किंमत २ आणे, ट. ॥ आणा.

तुकारामाष्टक. ... ... किंमत ॥ आणा, ट. ॥ आणा.

दारूची लावणी. ... ... किंमत । आणा, ट. ॥ आणा.

दिनार्वस. ... ... किंमत १४ आणे, ट. १॥ आ.

दिवाळी. ... ... किंमत १ आणा, ट. ॥ आणा.

दुःखिताश्रुमार्जन. ... ... किंमत ३ आणे, ट. ॥ आणा.

देवीमाहात्म्य. (सप्तश० प्रा०ओ० टीका.) किंमत १। रुपये, ट. २ आणे.

द्रौपदीहरण... ... ... किंमत १ आणा, ट. ॥ आणा.

धर्मसिंधु. (संस्कृत मूळ व मराठी भाषांतर.) किंमत ६ रुपये, ट. ६ आणे.

धर्मराजद्रौपदीसंवाद. ... ... किंमत १॥ आणा, ट. ॥ आणा.

नलदमयंतीचरित्र. ... ... किंमत ४ आणे, ट. ॥ आणा.

नागानंदसार. ... ... किंमत २॥ आणे, ट. ॥ आणा.

पथ्यापथ्यविचार. ... ... किंमत २ आणे, ट. ॥ आणा.
पाळणे. ... ... किंमत ॥ आणा, ट. ॥ आणा.
प्रपंच आणि परमार्थ. ... ... किंमत १ आणा, ट. ॥ आणा.
फुलांची परडी. ... ... किंमत ४ आणे, ट. ॥ आणा.
बाळमित्र. ... ... किंमत १ आणा, ट. ॥ आणा.
भाऊबंदांत कलह उत्पन्न होऊन विभक्त होतात त्याचीं कारणें
काय व ते न होण्याचे उपाय. किंमत ४ आणे, ट. ॥ आणा.
मनुवचन. ... ... किंमत १ आणा, ट. ॥ आणा.
महामारी. ... ... किंमत ६ आणे, ट. ॥ आणा.
मुद्राराक्षससार. ... ... किंमत ३ आणे, ट. ॥ आणा.
मुलांस उत्तम बक्षीस. ... ... किंमत ८ आणे, ट. १ आणा.
मुलांचें कल्याण. ... ... किंमत १॥ आणा, ट. ॥ आणा.
मुंबई युनिव्हर्सिटीचे संस्कृत म्याट्रिक्युलेशन पेपर व त्यांचीं उत्तरें
सन १८६२–१८८२. ... किंमत १८= रु.आ. ट. १ आणा.
ययातिराजाची कथा. ... ... किंमत १ आणा, ट. ॥ आणा.
यशोदागीत. ... ... किंमत ॥ आणा, ट. ॥ आणा.
राजगुरु दादोजी कोंडदेव आणि छत्रपति शिवाजीमहाराज.
किंमत ६ आणे, ट. १ आणा.
रामनवमी. ... ... किंमत १ आणा, ट. ॥ आणा.
रामविजयग्रंथ. (ओंवीबद्ध)... ... किंमत ३ रुपये, ट. १० आणे.
रुक्मिणीस्वयंवर. रेशमी पुठ्यानें बांधलेलें. किंमत ८ आणे, ट. १ आणा.
,, साधें. ... ... किंमत ६ आणे, ट. १ आणा.
वाल्मीकि रामायणाचें मराठी भाषांतर. किंमत २० रु. ट. १ रु. २ आणे.
वासवदत्ता कथासार. ... ... किंमत १ आणा, ट. ॥ आणा.
विचारसाधन. ... ... किंमत ४ आणे, ट. ॥ आणा.
विष्णुबावा ब्रह्मचारीकृत वेदोक्तधर्मविचार. किंमत ७ आणे, ट. ॥ आणा.
विदुरवचन.... ... ... किंमत २ आणे, ट. ॥ आणा.
विद्यार्थी. ... ... किंमत १॥ आणा, ट. ॥ आणा.
विद्यार्थ्यांचा व्याकरणमित्र.... ... किंमत १॥ आणा, ट. ॥ आणा.
वियुक्तदंपति प्रहसन. ... ... किंमत ४ आणे, ट. ॥ आणा.
शकुंतलाचरित्र. ... ... किंमत १ आणा, ट. ॥ आणा